॥श्रीगणेशायनमः॥देव्युवाच॥देवकेनविधानेनशुक्लपक्षेत्रयोदशी॥विधातव्यानरै
र्भिःसंतानफलसिद्धये॥१॥ईश्वरउवाच॥उद्यापनविधिंवक्ष्येशृणुयत्नेनपार्वती॥य
दात्रयोदशीशुक्लामंदवारेणसंयुता॥२॥आरब्धव्यंव्रतंतत्रसंतानफलसिद्धये॥ऋण
निर्मोचनार्थंतुभौमवारेणसंयुता॥३॥सौभाग्यस्त्रीसमृध्यर्थंभृगुवारेणसंयुता॥आ
युरारोग्यसिध्यर्थंभानुवारेणसंयुता॥४॥एकवत्सरपर्यंतंप्रतिपक्षेत्रयोदशी॥घ
टीत्रयादस्तमयात्पूर्वंस्नानंसमाचरेत्॥५॥शुक्लांबरधरोभूत्वावाग्यतोनियमान्वितः।
कृतसंकल्पविधिवत्ततःपूजांसमारभेत्॥६॥कर्षमात्रसुवर्णेनतदर्द्धार्द्धेनवापुनः।द्वाद
शप्रतिमाःकार्याःशिवरुद्रादिनामभिः॥७॥उमामहेश्वरंदेवंपूर्वोक्तस्यचतुर्गुणं।तद
र्द्धंवातदर्द्धंवावित्तशाठ्यंनकारयेत्॥८॥वस्त्रमंडपिकांकृत्वाचतुर्द्वारोपशोभितां।द्वारे

षु चतुरो वेदान्द्वौ वेदौ वेदमेव वा॥९॥पारायणपरान्विप्रान् अर्चयित्वा तु योजयेत्। आचा
र्यं वरयेत्पूर्वं स्वस्तिवाचनपूर्वकं॥१०॥ वेदवेदांगतत्त्वज्ञं शांतं दांतमकोपनं। अभ्यर्च्य गं
धपुष्पाद्यैर्भूषणाच्छादनादिभिः॥११॥ ऋत्विजो वेदसंपन्नान् व्रतकर्मणि कोविदान्।
सपत्नीकाननागमज्ञान् सदाचारपरायणान्॥१२॥ अभ्यर्च्य गंधपुष्पाद्यैर्वस्त्रैराभरणा
दिभिः। यदा त्रयोदशी शुद्धा मलमासादिवर्जिता॥१३॥ तदोद्यापनमारभ्य ऋत्विग्भिः सह पू
जयेत्। अथाचार्यो द्विहस्तेन कुर्वीत स्थंडिलं समं॥१४॥ चतुरंगकवर्णैश्च नीलपीतैः
सितासितैः। दशस्वस्तिकसंयुक्तं लिंगान्यप्यर्कसंख्यया॥१५॥ तन्मध्ये ष्टदलं पद्मं संस्था
प्य चतुरस्रं चतुरान्। प्रत्येकं द्रोणमानेन व्रीह्यादींश्च प्रकल्पयेत्॥१६॥ तदर्धतंडुलान्कृत्वा
तिलांश्चार्पितदर्धकं। तन्मध्ये स्थापयित्वा तु कुंभं कनकसंयुतं॥१७॥ तन्मुखे स्थापयेत्पा १

त्रंताम्रंवावैणवंतुवा।अपूपपूरितान्कुंभान् वस्त्रयुग्मेनवेष्टितान्॥१८॥कृत्तिभिः प्रतिमाः
पूज्याः शिवाद्यैश्चैवनामभिः।शिवोरुद्रःपशुपतिर्नीलकंठोमहेश्वरः॥१९॥हरिकेशोविरूपा
क्षः पिनाकीत्रिपुरांतकः।शंभुर्जटीपशुपतिर्द्वादशाद्याः प्रकीर्तिताः॥२०॥षोडशैरुपचारैश्च
रुद्रमंत्रपुरःसरैः।घृतपूरितदीपांश्चस्थापयेद्दष्टदिक्षु च॥२१॥सहस्रनामभिस्तोत्रैर्ऋ
ग्यजुःसामसंस्तवैः।स्तुत्वाप्रदक्षिणीकृत्यनत्वापूजांसमाप्य च॥२२॥रात्रौजागरणंकुर्या
द्गीतवादित्रनिःस्वनैः।प्रभातेविमलेस्नात्वाकृत्वासंध्यादिकाः क्रियाः॥२३॥शुचिर्भूत्वास
मागत्यततःपूजांसमारभेत्।कृत्वेध्माधानपर्यंतंसहस्राणिसहस्रधा॥२४॥ईशान
इतिमंत्रांतेपक्वंकृत्वोपहोमकं।समिदाज्यचरुद्रव्यैर्घृताक्ततिलतंडुलैः॥२५॥ध्यायेअंध
सस्पतइत्यनुवाकस्यप्रत्यृचं॥शिवोरुद्रःपशुपतिर्हुत्वाद्वादशनामभिः।असौजुहोति
२६

२ चतुर्णां द्र॒ ॱधैरुत्तरादिभिः। आद्यमध्ये जुहोत्यग्नौ तत्पत्नीनां यथाक्रमं।।२७।। आद्यापरार्द्धे
जुहुयात्तत्सुतानां यथाक्रमं। नमः सोमाय चेत्यादि कृत्वा सप्तदशाहुती।।२८।। ततः स्वि
ष्टकृतं कृत्वा होमशेषं समापयेत्। योरुद्र इति मंत्रेण हुतशेषं निवेदयेत्।।२९।। अथा
चार्यमलंकृत्वा गां दद्यात्पयस्विनी। ऋत्विग्भ्यो वेदविद्भ्यश्च प्रत्येकं चापि दक्षिणा।।३०।।
दद्याच्च प्रतिमास्तेभ्यः शिवाद्येश्चैव नामभिः। सधान्यं हेमसंयुक्तं वस्त्रदक्षिणसंयुतं।।३१।।
आचार्याय विशेषेण पूजोपकरणैः सह। प्रतिमां वस्त्रसंयुक्तां तत्तन्मंत्रैर्निवेदयेत्।।३२।।
वृषराजं समभ्यर्च्य वृषमंत्रेण मंत्रवित्। धर्मस्त्वं वृषरूपेण जगदानंदकारक।।३३।। अ
ष्टमूर्तेरधिष्ठानमतः पाहि सनातन। वृषस्य वृषणौ स्पृष्ट्वा शृंगयोर्मध्यतः शिवं।।३४।।
विलोक्य सहितं देव्या पूजितं प्रार्थयेच्छिवं। रूपरोगादिदारिद्र्यपापरुक्क्षयमव्ययः।।३५ २

उपायनमिदं तुभ्यं व्रतसंपूर्णहेतवे वायनं द्विजवर्याय सहिरण्यं ददाम्यहम्॥

अथ द्वात्रिंशत्पौर्णमासीव्रतं भाषायां बत्तिशी पौर्णमासीत्युच्यते॥ तदुक्तं भविष्ये॥ पौर्णिमा मार्गशीर्ष
स्यत स्यामारभ्यते व्रतं॥ उमया सहितो देवः पूजनीयो महेश्वरः॥१॥ एकैकं दीपिकं कृत्वा मासि मासि
वदापयेत् एवं सार्धद्वयं वर्षद्विमासाधिकमाचरेत्॥२॥ नभसः पौर्णिमायां च कुर्यादुद्यापनं त
तः॥ अथवा शुभमासस्य पौर्णिमायां समाचरेत्॥३॥ चतुर्दश्यां शुभे पक्षे द्वात्रैः पूजनमारभेत्॥ ति
थ्यादि संकीर्त्य आत्मनः इहजन्मनि जन्मांतरे वा वैधव्यनाशपुत्रपौत्रसौभाग्यादिप्राप्तिपूर्वक
भर्तुरायुर्वृद्धिद्वारा उमामहेश्वरप्रीत्यर्थं आचरितस्य द्वात्रिंशत्पौर्णमासीव्रतस्य पूर्णतासिद्
ध्येतदुद्यापनं कर्म करिष्ये॥ ततः वृत्ताचार्यः लिंगतोभद्रस्थकलशोपरि मंडउमामहेशौ ॐ नमः शि
वायेत्स्थापयेत्॥ ततः षोडशोपचारैः संपूज्य॥ प्रातः अग्निस्थापनं अन्वादध्यात्॥ अत्र प्र
धानं उमामहेशौ प्रवति लाज्यद्रव्यैः प्रत्येकं अष्टोत्तरशतसंख्याकाहुतिभिः ब्रह्मादिमंडल
देवताश्च एकैकयाज्याहुत्या यक्ष्ये॥ ततः द्वात्रिंशद्धनयुतं वंशपात्रे व्रीह्युपरि स्थं द्वात्रिंश
न्महाशीपानद्वात्रिंशत्फलवस्त्रदक्षिणादियुतान् कृत्वा दद्यात्॥ तत्र मंत्रः॥ महेशः प्रतिगृह्णा
तु महेशो वै दाता शिवा महेश स्तारको भाभ्यां महेशायनमो नमः॥१॥ द्वात्रिंशत्फलैर्दीपैः संयुतं वै
ष्टितं वायनकेनचतुष्टयं ददामि गिरिजाप्रीतये॥२॥ वायनं दद्यात्॥ ततः द्वात्रिंशद्ब्राह्मणान् सदक्षि
णं दत्त्वा संतर्प्य इति॥ इति द्वात्रिंशत्पौर्णमासीव्रत